## चतुर्थः पाठः

# यौतुकः पापसञ्चयः

*[ भारतीय समाज दहेज प्रथा के दारुण अभिशाप से पीड़ित है। अधिक धन और दहेज लाने वाली असंस्कृत वधू परिवार में सम्मान पाती है। इसके विपरीत निर्धन परिवार की सुशीला, सुसंस्कृता वधू को पग-पग पर उपेक्षा, अपमान और कटु वाक्यों से लांछित किया जाता है। परन्तु, विपत्ति आने पर निष्कलंकहृदया सुसंस्कृत वधू ही सहायक होती है। प्रस्तुत नाटक में एक छोटी-सी कहानी के माध्यम से इसी तथ्य को रेखांकित किया गया है। ]*

**विनयः** – अद्य असमये कथं स्मृतोऽस्मि मित्र रमानाथ!

**रमानाथः** – अधुना इमं कलहं सोढुम् असमर्थोऽस्मि।

**विनयः** – कः कलहः?

**रमानाथः** – तव तनया सुमेधा।

**विनयः** – किं भणसि मित्र? चतुर्वर्षैः सेविकावत् सा वराकी सपरिवारस्य तव सेवायां रता किन्त्वधुना.....।

**रमानाथः** – आम्! रतासीत् किन्त्वधुना मम कनिष्ठपुत्रवधूचपलायाः पित्रा श्रेष्ठिदुर्गादासेन प्रेषिते सेविके सर्वगृहकार्यं कुरुतः।

**विनयः** – वयस्य! किं कथयिष्यन्ति जनाः? स्वपरिवारस्य मर्यादां विचिन्तय। एवं बालमित्रस्य असम्मानं त्वत्तः नापेक्ष्यते, यतः कुलीनोऽसि त्वम्।

**रमानाथः** – कुलीनतयैव तु त्वं विचारार्थमाकारितोऽसि।

**विनयः** – किं त्वं न स्मरसि यत् तव गुणज्ञेन पुत्रेण स्वयमेव वृता मम दुहिता। चिन्तय, प्रवासादुपावृत्तं तं किं प्रत्युत्तरिष्यसि?

**रमानाथः** – एतदेव यत् निर्धनायै शरणस्थलं नास्ति मम सदनम्।

**विनयः** – पुनः विचारय मित्र! सम्प्रदत्तायाः भारं वोढुं कथं सक्षमोऽस्ति एकोऽकिञ्चनः।

**रमानाथः** – एतत् त्वया चिन्त्यमेष मम निश्चयः यत् सुमेधाद्यैव त्वया सह गमिष्यति अन्यथा तया सह तव सम्मेलनं न पुनः......।

**विनयः** – (सोद्वेगम्) नहि नहि। नैवं भवितुं शक्यते। सा विदुषी सुसंस्कृता सहनशीलापि। ममात्मजास्ति सा। बहुकष्टैः पालिता। अस्मिन् युगे दुहिता भाररूपा नास्ति। सामाजिकपरम्परावशेनैव सम्प्रदेया सा निर्जीववस्तु नास्ति सा। यदि त्वत्सदृशाः कुबेराः पुत्रवध्वाः जीवननिर्वाहकृतेऽक्षमाः परं मत्सदृशश्रमजीविगृहे भोजनाभावो न वर्तते।

**रमानाथः** – मामवगन्तुं प्रयतस्व मित्र! विवशोऽस्म्यहम्।

**विनयः** – (सक्रोधम्) पालयितुं समर्थोऽस्म्यहम्। (तूष्णीं स्थित्वा) वलीयसी ईश्वरेच्छा।

**(सजलपात्रा प्रविशति सुमेधा)**

**विनयः** – नहि सुमेधे! तव धनिश्वसुरेण पूर्वमेव पर्याप्तं जलं पायितम्।

**सुमेधा** – कृपया मम श्रद्धेयश्वसुरं माधिक्षिपतु भवान्। सम्मानेच्छुकैः समानस्तरपरिवार एव कन्या प्रदेया।

**रमानाथः** – सुमेधे! आप्ताः नोपदेष्टव्याः।

**विनयः** – सत्यमेवैतत्। परं त्वं तु साग्रहं याचितासि। अधुना चिन्तया किम्? (क्षणं विचिन्त्य) गच्छ, अन्तः प्रविश्य सर्वानभिवाद्य आगच्छ। त्वामानेतुमागतोऽस्मि। अलं विलम्बेन।

**(सुमेधा सचकिता पितृश्वसुरौ पश्यति)**

**रमानाथः** – सुमेधे! गृहं गत्वा भोजनव्यवस्थां कुरु। अद्याहं स्वबालमित्रेणैव सह भोक्ष्यामि।

**सुमेधा** – यदाज्ञापयति भवान् (प्रतिगच्छति)।

**रमानाथः** – (विनयं प्रति) प्रतीक्षतां तावत्। सत्वरमेवागच्छामि।

**(बहिर्गच्छति)**

(विनयः चिन्तितः तिष्ठति। एतदनन्तरं दूरभाषस्य घण्टिका श्रूयते। अन्त प्रकोष्ठात् एका स्थलूकाया स्त्री आगत्य यन्त्रम् उत्थापयति।)

**रम्भा** – हला! श्रेष्ठिरमानाथस्य भार्या रम्भास्म्यहम्। कः ........हमीद.......... कथय......... मम पतिः क्षतविक्षतः ........कथं ......दुर्घटनायाम् ..............कुतः भणसि ...........मिशनचिकित्सालयात् (रोदिति) अचिरेणागच्छामि।

**विनयः** – (स्वगतम्) कर्मणां फलं भोक्तव्यमेव। (ततः प्रविशति रमानाथस्य सुसज्जिता पुत्रवधू चपला)।

**चपला** – मातः! गन्तुमुद्यतास्मि। मम मातृगृहे उत्सवः .......

**रम्भा** – चपले! तव श्वसुरः दुर्घटनाग्रस्तः चिकत्सालये वर्तते आगच्छ मया सह। न जाने कावश्यकता स्यात्।

**चपला** – अहं तत्र किं करिष्यामि। रुग्णस्य चिकित्सा तु चिकित्सकस्य कार्यम्। उत्सवे मम गमनम् अनिवार्यम्।

**रम्भा** – क्षतं वृद्धशरीरं चिकित्सयापि अधिकां परिचर्यां सहानुभूतिं चापेक्षते।

**चपला** – परिचर्यार्थं परिचारिकाणां नाल्पत्वं चिकित्सालये। सुमेधां नय। सेवायां सा दक्षा।

**(एवं कथयन्ती चपला बहिर्निर्गच्छति)**

**(द्वितीयः दृश्यः)**

**(रमानाथः पत्रं पठति। रम्भासमीपे उपविष्टा दृश्यते।)**

**रम्भा** – कस्य पत्रमिदम्?

**रमानाथः** – विनयस्य। अस्माकम् कुशलं पृच्छति सूचयति च यत् सोऽद्य साम्प्रतमेव सुमेधामानेतुमागच्छत्येव।

**रम्भा** – नैवम्। न गमिष्यति सा। ममैव बुद्धिः भ्रमिता। हितैषिणः आपत्काल एव परीक्ष्यन्ते। दुर्घटनया मम नेत्राभ्यां काञ्चनकान्तिसमुत्पन्नम् अन्धत्वम् अपनीतम्। तस्याः एव रक्तेन मम सौभाग्यलालिमा सुरक्षीकृता।

**रमानाथः** – सुमेधायाः रक्तम्?

**रम्भा** – आम्। रक्तस्रावाधिक्येन रक्तस्य आवश्यकतासीत्। केवलं सुमेधायाः एव रक्तं भवतः रक्तसमूहेन सममासीत्। सा सहर्षं साग्रहं रक्तं दत्तवती।

**रमानाथः** – सा तु निर्धनस्य दुहिता अतः न सम्माननीया।

**रम्भा** – अहं लज्जितास्मि। चपलायाः धनाढ्यता मां स्वार्थिनीमकरोत् किन्तु सा क्षुद्रा तु तस्मिन्नवसरेऽपि....।

**रमानाथः** – क्षुद्रा! नहि नहि सा तु सुसभ्या, सुशिक्षिता, धनाढ्या।

**रम्भा** – (सक्रोधम्) शिक्षितापि अशिक्षिता, असंस्कृता, स्वार्थिनी ........(विनयः प्रविशति रमानाथस्य कुशलं पृष्ट्वा च उपविशति)।

**विनयः** – का आज्ञा वर्तते साम्प्रतं श्रेष्ठिरमानाथ?

**रमानाथः** – मिष्टान्नमास्वादय स्वमित्रस्य पुनर्जीवनलाभावसरे।

**रम्भा** – न तु स्वमित्रस्य कृते अपितु मम विवेकप्राप्त्यवसरे।

**विनयः** – स्पष्टमभिधीयताम्। अवगन्तुमसमर्थोऽस्मि।

**रम्भा** – स्पष्टीकरोमि सुमेधां प्राप्य वयं धन्याः। तस्या त्यागः श्लाघ्यः सुमेधायाः रक्तदानेनैव एष जीवितः।

**रमानाथः** – आम्। रक्तदानं जीवनं ददाति, रक्तपातम् अपहरत्येव।

**विनयः** – रमानाथ! कृतज्ञोऽस्मि। त्वया धर्मसङ्कटेन रक्षितः।

**रमानाथः** – न तु मया अपितु व्रणैः। कदाचित् दुखःमपि सुखवाहकं भवति। अस्माभिः ज्ञातव्यं यत् गुणैः गौरवमायाति न च यौतुकैः। यौतुकः पापसञ्चयः इत्यपि अस्माभिः विचारणीयः।

**विनयः** – सत्यमेव। न त्यागः निष्फलः कदापि।

**रमानाथः** – मित्र! त्वमपि माम् अवगन्तुमक्षमः। तस्मिन् काले सुमेधायाः जीवनं दुःखमयमासीत्। तस्याः त्यागशीलता विनम्रता च तस्याः कृते शत्रू अभूताम्। तस्याः दुःखं मत्कृते असहनीयम् अतः पुत्रस्य प्रवास प्रत्यागमनपर्यन्तम् अहं स्वपुत्रवधूं तुभ्यं न्यासरूपेण समर्पयितुंनिश्चितवान्।

**विनयः** – क्षमस्व मित्र! क्रोधानलः यथार्थचिन्तदाहकः परमधुनान्तं सुखदं तु सर्वं सुखदम्।

**(पटाक्षेपः)**

# अभ्यास प्रश्न

1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए–
   (क) सुमेधा कस्य तनया आसीत्? **(2018HT, 19AU)**
   (ख) सुमेधायां के गुणाः आसन्? **(2019AR)**
   (ग) रमानाथस्य गृहे कलहमूलं किम्?
   (घ) रम्भायाः सुमेधया सह दुर्व्यवहारस्य किं कारणम्?
   (ङ) रमानाथस्य गृहे सर्वाणि गृहकार्याणि कः अकरोत्?
   (च) चपलायाः स्वभावे का विशेषता?
   (छ) रमानाथाय रक्तं का अददात्? **(2020MT)**
   (ज) चपला कथं स्वार्थिनी अभूत्?
   (झ) सुमेधा चपला च के आस्ताम्?
   (ञ) रम्भा कस्य भार्या?
   अथवा रम्भा कस्य भार्या अस्ति? **(2019AS)**
2. 'यौतुकः पापसञ्चयः' पाठ का सारांश लिखिए।
3. 'यौतुकः पापसञ्चयः' पाठ के आधार पर रमानाथ का चरित्र-चित्रण कीजिए। **(2019AR, AU, 20MO, MQ, MS)**
4. 'यौतुकः पापसञ्चयः' पाठ के आधार पर सुमेधा का चरित्र-चित्रण कीजिए। **(2018HP, HQ, 19AS)**
5. 'यौतुकः पापसञ्चयः' पाठ के आधार पर विनय का चरित्र-चित्रण कीजिए। **(2019AQ)**
6. 'यौतुकः पापसञ्चयः' पाठ के आधार पर रम्भा का चरित्र-चित्रण कीजिए। **(2019AP, AR, 20MP, MT)**
7. 'यौतुकः पापसञ्चयः' पाठ के आधार पर चपला का चरित्र-चित्रण कीजिए।

# वस्तुनिष्ठ प्रश्न

**निम्न चार विकल्पों में से सही विकल्प का चयन कीजिए–**

1. **सुमेधा .............................. पुत्री आसीत्।**
   (क) रमानाथस्य (ख) विनयस्य (ग) रम्भायाः (घ) शिवदासस्य
2. **सुमेधा आसीत् ..................................।**
   (क) रमानाथस्य ज्येष्ठ पुत्रस्य पत्नी (ख) रमानाथस्य पत्नी (ग) रमानाथस्य भगिनी
3. **नाटकस्य मुख्य चरित्रः का/कः–**
   (क) रमानाथः (ख) विनयः (ग) रम्भा (घ) सुमेधा
4. **रमानाथाय रक्तं अददात्–**
   **अथवा रमानाथाय रक्तं अददात्.............................।** **(2019AQ)**
   (क) सुमेधा (ख) रम्भा (ग) चपला (घ) विनयः
5. **समाजे ................................ निन्दनीयः।**
   (क) यौतुकः (ख) परोपकारः (ग) अध्ययनः (घ) सदाचारः
6. **'यौतुकः पाप सञ्चयः नाटकस्य नायिका ........... अस्ति।**
   (क) चपला (ख) सुमेधा (ग) रम्भा (घ) कमला

## ➡ आन्तरिक मूल्यांकन

दहेज की रोकथाम के लिए आप क्या-क्या करेंगे? अपने विचार अभिव्यक्त कीजिए।

●